# गुरुपरम्पराचरमश्लोकाः

१) ब्रह्मान्ता गुरवः साक्षादिष्टं दैवं श्रियःपतिः ।
आचार्याः श्रीमदाचार्याः सन्तु मे जन्मजन्मनि ॥

२) श्रीहंसं परमात्मानं विरिञ्चिं सनाकादिकान् ।
दूर्वाससो ज्ञाननिधीन् वीन्द्रवाहनतीर्थकान् ॥

३) कैवल्यतीर्थान् ज्ञानेशान् परतीर्थान् नमाम्यहम् ।
सत्यप्रज्ञान् प्राज्ञतीर्थानन्यान् तद्वंशजानपि ॥

४) पुरैव कृष्णासिद्धान्नभुक्त्या शोधितमानसम् ।
अच्युतप्रेक्षतीर्थश्च मध्वार्याणां गुरुं भजे ॥

५) लसतु श्रीमदानन्दतीर्थेन्दुर्नो हृदम्बरे ।
यद्वचश्चन्द्रिका स्वान्तसन्तापं विनिकृन्ततु ॥

६) पूर्णप्रज्ञकृतं भाष्यं आदौ तद्भावपूर्वकम् ।
यो व्याकरोन्नमस्तस्मै पद्मनाभाख्ययोगिने ॥

७) ससीता मूलरामार्चा कोशे गजपतेः स्थिता ।
येनानीता नमस्तस्मै श्रीमन्नृहरिभिक्षवे ॥

८) साधिताखिलसत्तत्त्वं बाधिताखिलदुर्मतम् ।
बोधिताखिलसन्मार्गं माधवाख्ययतिं भजे ॥

९) यो विद्यारण्यविपिनं तत्त्वमस्यसिनाऽच्छिनत् ।
श्रीमदक्षोभ्यतीर्थार्यहंसिनं तं नमाम्यहम् ॥

१०) यस्य वाक् कामधेनुर्नः कामितार्थान् प्रयच्छति ।
सेवे तं जययोगीन्द्रं कामबाणच्छिदं सदा ॥

११) माद्यदद्वैत्यन्धकारप्रद्योतनमहर्निशम् ।
विद्याधिराजं सुगुरुं ध्यायामि करुणाकरम् ॥

१२) वीन्द्रारूढपदासक्तं राजेन्द्रमुनिसेवितम्
श्रीकवीन्द्रमुनिं वन्दे भजतां चन्द्रसन्निभम् ॥

१३) वासुदेवपदद्वन्द्ववारिजासक्तमानसम् ।
पदव्याख्यानकुशलं वागीशयतिमाश्रये ॥

१४) द्युमण्यभिजनाब्जेन्दू रामव्यासपदार्चकः ।
रामचन्द्रगुरुर्भूयात् कामितार्थप्रदायकः ॥

१५) यद्भत्त्या मूलरामस्य पेटिका त्यक्तभूमिका ।
विद्यानिधिर्धियं दद्यात् अष्टषष्ट्यब्दपूजकः ॥

१६) रघुनाथगुरुं नौमि विद्यानिधिकरोद्भवम् ।
कूर्मौ वरुणगङ्गे च यस्य प्रत्यक्षतां गताः ॥

१७) महाप्रवाहिनी भीमा यस्य मार्गमदान्मुदा ।
रघुवर्यो मुदं दद्यात्कामितार्थप्रदायकः ॥

१८) भावबोधकृतं सेवे रघूत्तममहागुरुम् ।
यच्छिष्यशिष्यशिष्याद्याः टिप्पण्याचार्यसंज्ञिताः ॥

१९) न दग्धं यस्य कौपीनं अग्नौ दत्तमपि स्फुटम् ।
वेदव्यासगुरुं नौमि श्रीवेदेशनमस्कृतम् ॥

२०) श्रीमत्सुधाद्भुताम्बोधिविक्रीडनविचक्षणान् ।
वाक्यार्थचन्द्रिकाकारान् विद्याधीशगुरून् भजे ॥

२१) विद्याधीशाब्धिसम्भूतो विद्वत्कुमुदबान्धवः ।
वेदनिध्याख्यचन्द्रोऽयम् कामितार्थान् प्रयच्छतु ॥

२२) वेदनिध्यालवालोत्थः विदुषां चिन्तितप्रदः ।
सत्यव्रताख्यकल्पद्रुः भूयादिष्टार्थसिद्धये ॥

२३) अनधीत्य महाभाष्यं व्याख्यातं यदनुग्रहात् ।
वन्दे तं विधिना सत्यनिधिं सज्ज्ञानसिद्धये ॥

२४) सत्यनाथगुरुः पातु यो धीरो नवचन्द्रिकाम् ।
नवामृतगदातीर्थताण्डवानि व्यचीक्लृपत् ॥

२५) सत्यनाथाब्धिसम्भूतः सद्बोगणविजृम्भितः ।
सत्याभिनवतीर्थेन्दुः सन्तापान् हन्तु सन्ततम् ।

२६) सत्याभिनवदुग्धाब्धेः सञ्जातः सकलेष्टदः ।
श्रीसत्यपूर्णतीर्थेन्दुः सन्तापान् हन्तु सन्ततम् ॥

२७) सत्यपूर्णाम्बुधेर्जातो विद्वज्जनविजृम्भितः ।
धनीध्वंसीतु नस्तापं श्रीसत्यविजयोडुपः ॥

२८) श्रीसत्यविजयाम्बोधेः जातं सत्यप्रियामृतम् ।
जरामृती जङ्घनीतु विबुधानां मुदे सदा ॥

२९) नैवेद्यगविषं रामे वीक्ष्य तद्भक्तिभाक् गुरुः ।
योऽदर्शयद्रविं रात्रौ सत्यबोधोऽस्तु मे मुदे ॥

३०) विष्णोःपदश्रित् गोव्रातैः स्वान्तध्वान्तनिवारकः ।
श्रीसत्यसन्धसूर्योऽयं भासतां नो हृदम्बरे ॥

३१) श्रीसत्यसन्धसिन्धूत्थः श्रीसत्यवरचन्द्रमाः ।
प्रार्थितार्थप्रदो नित्यं भूयः स्यादिष्टसिद्धये ॥

३२) श्रीसत्यवरदुग्धाब्धेः उत्थिता जगतीतले ।
सुधा श्रीसत्यधर्माख्या पावयेत् स्मरतः सतः ॥

३३) सत्यधर्माब्धिसम्भूतः चिन्तामणिविजृम्भितः ।
सत्यसङ्कल्पकल्पद्रुः कल्पयेत् कामधुङ् मम ॥

३४) सत्यसङ्कल्पवार्ध्युत्थः सत्यसन्तुष्टचन्द्रमाः ।
प्रार्थिताशेषदाता च भक्तवृन्दस्य नित्यदा ॥

३५) सत्यसन्तुष्टदुग्धाब्धेर्जातः सत्यपरायणः ।
चिन्तामणिः सदा भूयात् सतां चिन्तितसिद्धये ॥

३६) सत्परायणदुग्धाब्धेः सञ्जाता कीर्तिकामदा ।
कामधेनुः सत्यकामनाम्नी भूयात् सतां मुदे ॥
३७) सत्यकामार्णवोद्भूतः श्रीमत्सत्येष्टसद्गुरुः ।
सतां चिन्तामणिरिव चिन्तितार्थप्रदो भुवि ॥
३८) सत्येष्टार्यसरिन्नाथादुद्भूतोऽद्भुतदर्शनः ।
नाशयेद् हृदयध्वान्तं सत्पराक्रमकौस्तुभः ॥
३९) सत्पराक्रमदुग्धाब्धेः सञ्जातः कीर्तिचन्द्रिकः ।
सन्तापं हरतु श्रीमान् सत्यवीरेन्दुरञ्जसा ॥
४०) सत्यवीरालवालोत्थः विदुषां चिन्तितप्रदः ।
सत्यधीराख्यकल्पद्रुः भूयादिष्टार्थसिद्धये ॥
४१) सत्यधीरकराब्जोत्थः ज्ञानवैराग्यसागरः ।
सत्यज्ञानाख्यतरणिः स्वान्तध्वान्तं निकृन्ततु ॥
४२) आसेतोरातुषाराद्रेः यो दिशो जितवान् मुहुः ।
सत्यध्यानगुरुः पातु यतीन्द्रैरपि पूजितः ॥
४३) प्रावोचद्योऽधिकं न्यायसुधावाक्यार्थचन्द्रिकाम् ।
सत्यप्रज्ञगुरुर्दद्यात् प्रज्ञां वैदान्तिकीम् सदा ॥
४४) वेङ्कटेशाद्रिमारभ्य सेतुं तोताद्रिपूर्वकान् ।
गत्वा दिग्विजयी पातु सत्याभिज्ञगुरूत्तमः ॥
४५) सत्याभिज्ञकराब्जोत्थान् पञ्चाशद्वर्षपूजकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥

॥ श्रीकृष्णार्पणमस्तु ॥